Gyanshauryam, International Scientific Refereed Research Journal
© 2022 GISRRJ | Volume 5 | Issue 1 | ISSN : 2582-0095

# स्वराद्यव्ययसञ्ज्ञाप्रबोध:

**डॉ.नवीनकुमारमिश्र:**

**संविदाध्यापक:,व्याकरणविभाग:,केन्द्रीयसंस्कृतविश्वविद्यालय:, क.जे.सोमैया.मुम्बईपरिसर:,मुम्बई ।**

**Article Info**
Volume 5, Issue 1
Page Number : 85-97

**Publication Issue :**
January-February-2022

**Article History**
Accepted : 01 Feb 2022
Published : 10 Feb 2022

**शोधपत्रसार:- उद्देश्यम्**-आनरपामराणां संस्कृतसुकुमारमतीनां कृतेऽअव्ययसञ्ज्ञाविषयकं विशेषप्रतिपत्तिं वारणायायं शोधपत्रं मया प्रस्तूयते । जनेषु संस्कृतप्रचारप्रसाराय संस्कृतवीराणां कृते इदं पाथेयं भवति । शोधपत्रप्रकृति: - स्वरादिनिपातमव्ययम् इति सूत्रगतमव्ययानां सार्थसारणीकरणम् । अत्रानेकविधाव्ययानां भेदा:- समुल्लिखिता: सन्ति । छात्रेभ्य:अव्ययान् ज्ञातुमत्र प्रयत्न:विहित:।

**शोधबिन्दव:**- विभक्तिप्रतिरूपकम्- कुत:, ग्रामत:, अत्र, तत्र, कुत्र, सर्वत्र, एकत्र । कालप्रतिरूपकम्-यदा, कदा, तदा, सर्वदा, यर्हि, कर्हि, तर्हि । प्रकारवाची- यथातथा, इत्थम्, कथम्, द्वेधा, त्रेधा, पञ्चधा, षोढा । विविधबोधकम्-अनेकश:, बहूश:, पञ्चत्व:, गणधाकृत्वा, नानाकृत्वा, बहुधाकृत्वा । शोधपत्रफलम्-अव्ययानामर्थबोधे तेषां स्वरूपप्रत्यये संस्कृतानुरागीणां जिज्ञासूनाञ्च कृते फलवदिदं शोधपत्रम् ।

**नतोऽस्म्यहं त्वखिलहेतुहेतुं नारायणं पुरूषमाद्यमव्ययम् ।**

**यन्नाभिजातादरविन्दकोशाद् ब्रह्माऽविरासीद् यत एष लोक: ।।** श्रीमद्भागवतम् 10/40/01

**अव्ययपदार्थ:**- एकप्रकारकं न व्येति तदव्ययम् । क्व पुनर्न व्येति ? स्त्रीपुंनपुंसकानि,सत्वगुणा:,एकत्वद्वित्वबहुत्वानि च । एतानर्थान् केचित् वियन्ति,केचिन्न वियन्ति तदव्ययम् ।।

**व्यकरणमहाभाष्यम् 1.3.38**

**अव्ययलक्षणम्-**

**सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु ।**

**वचनेषु च सर्वेषु यन्न वेति तदव्ययम् ।। गोपथब्राह्मणे** 1.1.26

**वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयो: ।।**

**आपं चैव हलन्तानां यथा वाचा निशा दिशा ।।पदमञ्जरी 6.2.37**

**अव्ययभेद:**

**अव्युत्पन्नाव्ययपदम्(अविकारी**(रूढम्)
पठित्वा, पठितुम्

**व्युत्पन्नाव्ययपदम्(विकारी**(यौगिकम्)
च वा विना पृथक्

**Copyright:** © the author(s), publisher and licensee Technoscience Academy. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License, which permits unrestricted non-commercial use, distribution, and reproduction in any medium, provided the original work is properly cited







अयं स्वरादिराकृतिगणः आकृत्या गण्यते इति आकृतिगणः–इति शब्दकौस्तुभे । स्वरादीनां सत्ववाचिनाम्,असत्वाचिनां च अव्ययसंज्ञा व्यापिनी,चादीनां तु असत्ववाचिनामेव निपातसंज्ञा अव्यापिनी इति भेदः।

स्वरादिगणे केचन अन्तोदात्तविशिष्टाः–स्वर,अन्तर्,प्रातर् । पुनर् इत्याद.स्तु आद्युदात्ताः।

निश्चितः पात एषामिति निपातः। निपात्यन्ते यथाकथि्ंचत् साधु क्रियनते इति निपाताः। उत नियमेन पातयन्तिस्वार्थमन्यस्मिन् इति निपाताः– इति शेखरे ।

**प्रातिपकार्थयोगात् धातुच्छन्दोनिरुक्तयुक्त्या ।**

**यस्मान्निपतन्ति पदे तस्मात् प्रोक्ता निपातास्तु ।।-भरतमुनिः**

**स्वरादिनिपातमव्ययम् 1.1.37**

| क्र.सं. | अव्ययपदानि | अर्थाः |
|---|---|---|
| 1. | स्वर् | स्वर्गलोके परलोके वा |
| 2. | अन्तर् | अन्त:मध्ये वा |
| 3. | प्रातर्(प्रात:) | उषसि प्रत्यूषे |
| 4. | पुनर्(पुन:) | आभीक्ष्ण्ये अप्रथमे विशेषे च |
| 5. | सनुतर् | गोपने अदर्शने अन्तर्धाने वा |
| 6. | उच्चैस्(उच्चैः) | उपरि महती वा |
| 7. | नीचैस् (नीचैः) | अध: अल्पे |
| 8. | शनैस्(शनैः) | क्रियामान्द्ये |
| 9. | ऋधक् | सत्ये शीघ्रे सामीप्ये लाघवे वा |
| 10. | ऋते | वर्जने अभावे |
| 11. | युगपत् | एककाले |
| 12. | आरात् | आन्तिके दूरे दूरसमीपयो: |
| 13. | पृथक् | भिन्ने |
| 14. | ह्यस्(ह्यः) | गते दिवसे अतीते अह्नि |
| 15. | श्वस् (श्व:) | अनागते अह्नि आगामिनि अह्नि |
| 16. | दिवा | दिवसे |
| 17. | रात्रौ | निशि |
| 18. | सायम् | निशामुखे |
| 19. | चिरम् चिरेण चिराय चिररात्राय चिरात् चिरस्य | बहुकाले |
| 20. | मनाक् | मनाक् ईषत् -अल्पे मात्रायाम्, |
| 21. | जोषम् | सुखे |
| 22. | तूष्णीम् | मौने |
| 23. | बहिस् (बहि:) अवस् | बाह्ये |
| 24. | समया निकषा | सामीप्ये निकटे मध्ये च |
| 25. | स्वयम् | आत्मार्थे, वृथा-व्यर्थे |

| | | |
|---|---|---|
| 26. | नक्तम् | रात्रौ |
| 27. | नञ् | सादृश्ये अभावे भेदे अल्पे अप्राशस्त्ये विरोधे निषेधे तदर्थे तदाशये |
| 28. | हेतौ | निमित्ते कारणे |
| 29. | हे है | सम्बोधने |
| 30. | इद्धा | प्राकाश्ये |
| 31. | अद्धा | स्फुटावधारणयो: |
| 32. | सामि | अर्धे जुगुप्सिते च |
| 33. | अधस् | नीचै: |
| 34. | ब्राह्मणवत् क्षत्रियवत् मित्रवत् शत्रुवत् | तुल्ये,सना सनत् सनात्-नित्ये |
| 35. | उपधा | भेदे |
| 36. | तिरस् (तिर:) | अन्तर्धौ गोपने अदर्शने अन्तर्धाने वा |
| 37. | अन्तरा | मध्ये विनार्थे, अन्तरेण-विना वर्जने अभावे |
| 38. | ज्योक् योक् | कालाधिक्ये प्रश्ने शीघ्रे सम्प्रत्यर्थे च |
| 39. | मक् कम् | वारिमूर्धनिन्दासुखेषु |
| 40. | नक् | रात्रौ,निषेधे |
| 41. | शम् | सुखे |
| 42. | सहसा | आकस्मिकविमर्शयो: |
| 43. | श्रद्धा | आत्मभावसमर्पणे |
| 44. | विना | वर्जने अभावे राहित्ये |
| 45. | नाना | प्रकारभेदे बहुत्वे |
| 46. | स्वस्ति | मङ्गले कल्याणे च |
| 47. | स्वधा | पितृयज्ञे पितृतर्पणे च |
| 48. | अलम् | भूषणपर्याप्तिशक्तिवारणनिषेधेषु |
| 49. | वषट् श्रौषट् | देवहविर्दाने |
| 50. | वौषट् | न्यासे |
| 51. | अस्ति | सत्तायाम् |
| 52. | उपांशु | अप्रकटोच्चारणहास्ययो: |
| 53. | क्षमा | क्षान्तौ |

| | | |
|---|---|---|
| 54. | विहायसा | आकाशार्थे |
| 55. | दोषा | रात्रौ |
| 56. | मृषा | मिथ्या वृथा |
| 57. | मुधा | व्यर्थे असत्ये |
| 58. | पुरा | अविरते चिरातीते प्राक्काले |
| 59. | मिथो मिथस् (मिथः) | सहार्थे परस्परार्थे रहसि |
| 60. | दिष्टया | रीतौ अनुसारे परिप्रेक्ष्ये |
| 61. | प्रायस् (प्रायः) | बाहुल्ये |
| 62. | मुहुस् (मुहुः) | पुनरर्थे |
| 63. | प्रबाहुकम् प्रवाहिका | समानकाले ऊर्ध्वार्थे च |
| 64. | आर्यहलम् | बलात्कारे |
| 65. | अभीक्ष्णम् | पौनः पुन्ये |
| 66. | सह साकम् समम् सार्धम् सार्थम् सत्रम् | सहार्थे |
| 67. | नमस्(नमः | नतौ नमस्कारे प्रार्थनायाम् |
| 68. | हिरुक् | वर्जने |
| 69. | धिक् | धिक्कारे निन्दाभर्त्सनयोः |
| 70. | अथ | मङ्गलानन्तरारम्भप्रश्नकात्स्न्योधिकारप्रतिज्ञासमुच्चयवितर्कविकल्पेषु |
| 71. | प्रताम् | ग्लानौ |
| 72. | प्रशाम् प्रशान् | समानार्थे |
| 73. | प्रतान् | विस्तारे |
| 74. | मा माङ् | निषेधे |
| 75. | सदा | अनिशम् नित्यम् नित्यदा अजस्रम् सन्ततम् वा |
| 76. | अम् | शीघ्रता,अल्पम्, |
| 77. | श्रत् | श्रद्धा,विश्वासः,सत्यम् |
| 78. | कामम् | स्वाच्छन्द्यानिच्छाङ्गीकारपर्याप्तिप्रकामासूयाऽनुगमनादिष्वर्थेषु |
| 79. | प्रकामम् | अतिशये |

| | | |
|---|---|---|
| 80. | भूयस् (भूयः) | पुनरर्थे,आधिक्यार्थे,वीप्सायाम्,द्विर्वचने,प्राथम्यार्थे,अधिकार्थे |
| 81. | परम् | नियोगक्षेपकेवलकिन्त्वर्थेषु दृश्यते |
| 82. | साक्षात् | प्रत्यक्षतुल्यावस्यार्थौ |
| 83. | साचि (सावि) | तिर्यगर्थे |
| 84. | सत्यम् | प्रश्नप्रतिषेधार्धाङ्गीकाराज्ञस्येषु |
| 85. | मङ्क्षु | शीघ्रार्थसत्यार्थभृशार्थवह्वार्थकेषु |
| 86. | संवत् | वर्षार्थकहायनार्थकौ |
| 87. | अवश्यम् | निश्चये,अशक्यनिराकरणार्थे |
| 88. | सपदि | वर्तमानतत्क्षणशीघ्रार्थकेषु |
| 89. | प्रादुस् | नामप्राकाश्ययोः |
| 90. | आविस् | प्राकाश्ये,आविर्भावे,आविष्कारे |
| 91. | उषा | प्रातःकालार्थे |
| 92. | ओम् | प्रारम्भाङ्गीकारानुज्ञाऽन्तब्रह्मतूष्णीम्भावादिष्वर्थेषु |
| 93. | भूः(भूर्) | पृथिवीवाचको महाव्याहृतिविशेषोऽयमव्ययसंज्ञकः |
| 94. | भुवर् | अन्तरिक्षवाचके |
| 95. | झटिति | शीघ्रार्थके |
| 96. | तरसा | शीघ्रार्थके |
| 97. | अञ्जसा | तत्वशीघ्रार्थयोः |
| 98. | मिथ | परस्परम् |
| 99. | अमुथा | प्रकारार्थे |
| 100. 0 | विद्रुवम् | साम्प्रतम् |
| 101. | भाजक् | शीघ्रार्थके |
| 102. | अ | सम्बोधने,अभावे,अनुकम्पायाम्,स्वल्पार्थे,प्रतिषेधे |
| 103. | कु | पापा-कुत्सा-ईषदर्थ-निवारणेषु |
| 104. | अन्वक् | पश्चाद्गामी,मैत्री,आनुकूल्ये |
| 105. | अस्तम् | शैलविशेषादर्शनयोः |
| 106. | अम्नर् | शीघ्रसाम्प्रतिकयोः |
| 107. | अम्नस् | शीघ्रसाम्प्रतिकयोः |
| 108. | अम्भर् | जलम् |
| 109. | अम्भस् | जलम् |
| 110. | अनुषट् | अनुमाने |

| | | |
|---|---|---|
| 111. | अनुषक् | अनुमाने |
| 112. | आनुषक् | अनुमाने,बन्धुता |
| 113. | स्थाने | औचित्य-सत्य-सादृश्य-युक्तार्थेषु |
| 114. | वरम् | ईषत्,प्रियं,मनाग्, |
| 115. | सुष्ठु | समीचीनम्, सुन्दरम् |
| 116. | दुष्ठु | खलः |
| 117. | बलात् | बलपूर्वकम् |
| 118. | शु | प्रशंसा अक्षि प्रार्थनायाम् |
| 119. | अर्वाक् | अधरे |
| 120. | शुदि | शुक्लपक्षः |
| 121. | वदि | कृष्णपक्षः,औदीच्यदेशः,उत्तरदेशः |
| 122. | आम् | प्रतिवचनावधारणाभ्युपगमांगीकारस्मरणेषु |

चादयोऽसत्वे (पा.अ. 1.4.57)

| अव्ययपदानि | अर्थाः |
|---|---|
| च | समुच्चयान्वाचयेरतरयोगसमाहारेषु |
| वा | विकल्पोमयोरिवार्थेऽपि समुच्चये (विभाषा,अन्यतरस्याम्) |
| ह | प्रसिद्धौ |
| अह | अद्भुते खेदे च |
| एव | अवधारणे निश्चये अनवक्लृप्तौ च |
| एवम् | उक्तपरामर्शार्थे |
| नूनम् | निश्चये तर्के च |
| शश्वत् | पौनः पुन्ये नित्ये सहार्थे च |
| युगपत् | एककाले |
| भूयस् (भूयः) | पुनरर्थे आधिक्ये च |
| कूपत् | प्रश्ने प्रशंसायाञ्च |
| सूपत् सूपत्स कुवित् | भूर्यर्थे |
| नेत् ,चेत् | शंकायाम् ,यद्यर्थे,एवं न,यदि |
| चण्,कच्चित् | चेदर्थे, इष्टप्रश्ने,यदि,यदीत्थम् |
| किञ्चित् | अल्पे |

| | |
|---|---|
| यत्र | अनवक्लृप्त्यमर्षगर्हाश्चर्येषु |
| नह | प्रत्यारम्भे |
| हन्त | हर्षे विषादे अनुकम्पायां वाक्यारम्भे च |
| माकिः माकिम् (आकिम् ) नकिः(नकिम्) | वर्जने, निषेधे |
| माङ् नञ् | वर्जने, निषेधे |
| यावत् तावत् | शकलावधिमानधारणेषु |
| त्वा त्वै | विशेषवितर्कयोः |
| द्वै (न्वै ) | वितर्के |
| रै | दाने अनादरे च |
| श्रौषट् | देवाराधनायम् |
| वौषट्- देवाराधनायम् | देवाराधनायम् |
| स्वाहा- देवाराधनायम् | देवाराधनायम् |
| स्वधा | पित्राराधनायम् श्राद्धे तर्पणे च |
| वषट् | देवाराधनायम् |
| किम् | प्रश्ने,ओम्-स्वीकृतिः |
| तु तुम् | निरादरे तुङ्कारे |
| खलु | निषेधे वाक्यालंकारनिश्चयेषु कथने एका शैली |
| किल् | कथने एका शैली एवार्थे |
| अथ अथो | मंगलानन्तरारम्भप्रश्नकात्स्र्याधिकारप्रतिज्ञासमुच्चयेषु |
| सुष्ठु | सुन्दरम् |
| स्म | भूतकाले अतीते पादपूरणे च |
| आदह | निन्दोपक्रमहिंसाकुत्सनेषु |
| सम्यक्तया | समीचीनतया |
| शुकम् | शीघ्रम् |
| यथाकथाच् | अनादरः,(लगभग) |
| पाट् | सम्बोधनम् |
| प्याट् | सम्बोधनम् |
| पुरा | प्राक्काले,प्राचीनकाले |
| किम् | प्रश्ने, जिज्ञासायाम् |
| तत् | सर्वनाम् सुबन्तप्रतिरूपकमव्ययम् |

| | |
|---|---|
| यत् | हेत्वर्थकः |
| यथा | योग्यतावीप्सापदार्थानतिवृत्तिसादृश्येषु |
| तथा | तेन प्रकारेण |
| तथाहि | यतोहि |
| यम् | तथैव |
| सु | शोभने |
| सम् | सम्यक्त्वे,समन्तत्वे,श्लेषे,कूजनवर्तने |
| नहि, नेत्याह | निषेधार्थकः |
| ननु | परमताक्षेपानुज्ञापृष्टप्रतिवचनप्रश्ननयविरोधोक्तिवाक्यारम्भनिश्चादयः |
| नोचेत्, नचेत् | अन्यथा |
| मुधा | निष्फलम्,प्रीतिकरणम् |
| अनुकामम् | यथाकामम्,सहार्थे,हेतौ, |
| सुकम् | अतिशये |
| शिकम् ,शुकम्,श्वकम् | शीघ्रता |
| नहिकम् | निषेधार्थे |
| ना | अभावे |
| नुकम् , सनुकम् | वितर्के |
| सना | अतिप्राचीनः |
| हिकम् | यथासम्भवम् (वैदिकः) |
| ताजक् | शीघ्रार्थके |
| तक् | हर्षार्थकः |
| पशु | नहिकम्, निषेधार्थे |
| सत्यम् | प्रश्नप्रतिषेधाङ्गीकाराञेजस्येषु |
| ऋतम् | सत्यार्थे |
| श्रत् | विश्वासार्थकः |
| इद्धा | प्राकाश्यसामीप्यस्मरणेषु |
| असि | त्वमित्यर्थे |
| अस्मि | अहमित्यर्थे |
| स्म | अतीतवाक्यपूरणे |
| तकत् | अल्पार्थे |
| अम् | शीघ्रम्,अल्पम् |

| | |
|---|---|
| अम्न: | शीघ्रे साम्प्रतिके च |
| अमा | रहस्समवायसंयोगसामर्थ्येषु |
| अहह,अहहो | अद्भुतम्,खेदार्थे |
| उञ् | वितर्के,अवधारणे |
| उकञ् | वितर्के |
| हो | आश्चर्यसूचकम्,सम्बोधने,प्रतिवाक्ये,वियोगे च |
| हंहो | आह्वाने,दर्पदम्भप्रश्नापसा |
| ईहा | वाञ्छा |
| अहो | खेदाद्भुतानुकम्पासन्तोषेषु |
| अरे | हीनसम्बोधने |
| अरेरे | अधमसम्बोधने |
| आहोस्वित् | अथवा, उत |
| आहो | वितर्के,यद्यर्थे |
| उताहो | परिप्रश्नविचारयो:,अथवा |
| धिक् | धिक्कारे,हीने,अनादरे,निन्दायाम्,भर्त्सने |
| नु | वितर्के,निश्चयार्थे,प्रश्ने |
| इह | अत्र,अस्मिँल्लोलोके,सन्दर्भे,आधारे |
| इति | समाप्ते |
| अनु | पश्चात्,अनन्तरम् |
| अव | क्रोधे,अवरोधे,बोधे .धैर्ये,आलम्बने,भूषणे |
| इव | सदृशार्थे |
| चण् | चेदर्थे,यदि |
| वट् | प्रशंसायाम् |
| वाट् | हविर्दाने |
| अञ्जसा | तत्वम्, शीघ्रम् |
| प्रादुस् | नाम ,प्रकाशनम् |
| श्रुत् | शीघ्रम् |
| अङ्ग | पूजा, सम्बोधने |
| भो: | सम्बोधने |
| अये | सम्बोधने |
| पशु | सम्यगर्थे |

| | |
|---|---|
| ह्य | हिंसाप्रातिलोम्यपादपूरणेषु |
| वात् | सादृश्यार्थकः(छान्दसः) |
| बत | दया,खेदः |
| बाट् | हविर्दाने |
| दिष्ट्या | मङ्गले,आनन्दे,हर्षे च |
| कीम् | द्वेषरूपार्थः |
| कुम् | प्रश्नार्थकः(किमर्थम्) |
| शीम् | द्वेषः |
| सीम् | सर्वतोभावः,निश्चयेन |
| खम् | मन्त्रबीजाक्षरम् |
| खुम् | मन्त्रस्तोभाक्षरम् |
| हुम् | अनुकरणशब्दः |
| द्यु | वासरार्थकः,गगनार्थकः |
| फट् | विघ्नप्रतिहतस्य उत्सारणम्,अनुकरणशब्दः |
| छम्वट् | अन्तःकरणम् ,आभिमुख्ये |
| अध | आनन्तर्ये |
| अधस् | अधोभागे,नीचैः |
| वै | नियोगागमविशेषसम्बोधनानुनयनिश्चयपादूरणादिषु |
| न | निषेधोपमानयोः |
| शस् | बह्वाल्पार्थमङ्गलवचने(बहुशः,अल्पशः) |
| सम् | सम्यक्,समन्तत्वे,श्लेष,कूजने,स्मृते,क्रोधे,ऋद्धौ,<br>वाचिके,अनिश्चये,गुणाधाने,प्रतिज्ञायाम्,उद्योगे,<br>नियमे,विमर्शे,स्वीकारे,प्रीतौ,क्षये,वर्जने,काले,<br>परिचये,अल्पे,परिहारे |
| आस् | स्मरण-आक्षेप-कोप-सन्ताप-पीडा-खेद-सगर्ववर्जने |
| अन्तः | मध्ये |
| द्यौः | आकाशः |
| सुकृ | सम्यक्,समीचीनम् |
| दुर्नीतम् | कष्टसाध्यं नयनम् |
| दुर्नयः | हेयनिश्चयः,हेयसिद्धान्तः |
| दृन् | हिंसार्थकः,दृढार्थकः |

| | |
|---|---|
| आईम् | मृग्यः,स्तोभाक्षरमिदम् |
| चाटु | प्रियवाक्यप्रयेगे |
| ताजक् | शीघ्रम् |
| भाजक् | शीघ्रम् |
| युत् | घृणा |
| वेलायाम् | कालवाचकम् |
| मात्रायाम् | अल्पपरिमाणवाचकम् |
| पाम्पी | विस्तारविध्वंसमाधुर्यकरुणार्थेषु |
| ताली | विस्तारे,वर्णे,उत्तमे,विदूराकुलीभावे |
| आताली | विस्तारे,वर्णे,उत्तमार्थे,आकुलीभावे |
| वेताली | विदूराकूलीभ्वार्थे |
| धूसी | विस्तारे,कान्तौ,काङ्क्षायाम् |
| विषु | नानार्थे |
| एकपदे | अकस्मादर्थे,सहैव |
| युत् | कुत्सायाम् |
| आतः | सर्वतोभावे |

**उपसर्गविभक्तिप्रतिरूपकाव्ययम्-**

| क्र.सं. | उपसर्गविभक्तिप्रतिरूपकाव्ययपदानि | अर्थाः |
|---|---|---|
| 1 | निदत्तम् | निश्चयेन अददत् |
| 2 | सुदत्तम् | सम्यक्प्रकारेण अददत् |
| 3 | प्रदत्तम् | प्रभूतम् अददत् |
| 4 | विदत्तम् | विशेषेण अददत् |
| 5 | अनुदत्तम् | पश्चात् अददत् |
| 6 | अवदत्तम् | अददत् |
| 7 | परादत्तम् | पौनःपुन्येन अददत् |
| 8 | अहंयुः | अहंकारी |
| 9 | अस्तिक्षीरा | क्षीरयुक्ता गौः |

**स्वरप्रतिरूपकमव्ययम्-**

| क्र.सं. | स्वरप्रतिरूपकमव्ययपदानि | अर्थाः |
|---|---|---|

| | | |
|---|---|---|
| 1 | अ | आकृति:,विष्णु:, अनन्ते, सम्बोधने च |
| 2 | आ, इ,ई,उ,ऊ,ए,ओ,ऐ,औ | सम्बोधनम् |

**सन्दर्भग्रन्थसूची**


1. वैयाकरणसिद्धान्तकौमुदी-भट्टोजीदीक्षित:

2. अव्ययकोश:-श्रीवत्साङ्काचार्य:

3. उणादिकोश:-पं.चारुदेवशास्त्री

4. वैयाकरणसिद्धान्तसुधानिधि:-आचार्यश्रीविश्वेश्वरसूरि

5. राजस्थानमाध्यमिकस्तरीय संस्कृतपाठ्यपुस्तक:

6. बृहद्शब्दकुसुमाकर:-पं.हरेकान्तमिश्र:

7. काशिकावृत्ति:-जयादित्यवामनौ

8. व्याकरणमहाभाष्यम्-पतञ्जलिमुनि:

9. शास्त्रार्थरत्नमाला-एन्.एस्.रामानुजताताचार्य:

10. एन.सी.ई.आर.टी.संस्कृतपुस्तकानि

11. चिरन्तनी मार्गोपदेशिका-डॉ.रमाकान्तमिश्र:

12. संस्कृतप्रवेशिका-बाबूराम सक्सेना

13. बृहद् अनुवादचन्द्रिका-चक्रधरनौटियाल:

14. अनुवादरत्नाकर:-डॉ.रमाकान्त:

15. संस्कृतसहचर:-डॉ.राधामोहन:

16. संस्कृत-अव्यय-कोष:- श्रीगणेशवासुदेव करंदीकर: